(इयं हि सह्यपर्व्वतोद्भवा। यथा, विष्णुपुराणे। २। ३। ११।
"गोदावरी भीमरथी कृष्णवेण्यादिकास्तथा।
सह्यपादोद्भवा नद्यः स्मृताः पापभयापहाः॥")

भीमविक्रान्तः, पुं, (भीमश्चासौ विक्रान्तश्चेति।) सिंहः। इति त्रिकाण्डशेषः॥ भयानकविक्रम-विशिष्टे, त्रि॥

भीमशासनः, पुं, (भीमं शासनं यस्य।) यमः। इति शब्दरत्नावली॥

भीमसेनः, पुं, मध्यमपाण्डवः। स च कुन्तीगर्भे पवनाज्जातः। तत्पर्य्यायः। भीमः २ वीरवैराः ३ वृकोदरः ४ वकजित ५ कीचकजित् ६ किर्म्मीरजित् ७ जरासन्धजित् ८ हिड़िम्बजित् ९ कटभ्रणः १० नागवलः ११ गुडाकरः १२। इति शब्दरत्नावली॥ तस्य जन्मविवरणं यथा,
"धार्म्मिकस्तं सुतं लब्ध्वा पाण्डुस्तां पुनरब्रवीत्।
प्राहुः क्षात्रं बलं ज्येष्ठं बलज्येष्ठं सुतं वृणु॥
ततस्तथोक्ता भर्त्रा तु वायुमेवाजुहाव सा।
तस्माज्जज्ञे महाबाहुर्भीमो भीमपराक्रमः॥
तमप्यतिबलं जातं वागुवाचाशरीरिणी।
सर्व्वेषां बलिनां श्रेष्ठो जातोऽयमिति भारत!॥
इदमत्यद्भुतञ्चासीज्जातमात्रे वृकोदरे।
यदङ्कात् पतितो मातुः शिलां गात्रैरचूर्णयत्॥
कुन्ती व्याघ्रभयोद्विग्ना सहसोत्पतिता किल।
नान्वबुध्यत तं सुप्तमुत्सङ्गे स्वे वृकोदरम्॥
वज्रसंहननः सोऽथ कुमारो न्यपतद्गिरौ।
पतता तेन शतधा शिला गात्रैर्विचूर्णिता॥"
इति महाभारते आदिपर्व्वणि पाण्डवोत्पत्ति-नामाध्यायः॥
(गन्धर्व्वविशेषः। यथा, महाभारते।१।१२३।५२।
भीमसेनोग्रसेनौ च ऊर्णायुरनघस्तथा॥")
कर्पूरभेदः। यथा,—
"पोताशो भीमसेनस्तदनु शितकरः शङ्करा-वाससंज्ञः
प्रांशुः पिञ्जोऽब्जसारस्तदनु हिमयुता वालुका चूटिका च।
पश्चादस्यास्तुषारस्तदुपरि सहिमः शीतलः पत्रिकाख्या
कर्पूरस्येति भेदा गुणरसमहसा वैसदृश्येन दृश्याः॥"
इति राजनिर्घण्टः॥

भीमहासं, क्ली, (भीमे ग्रीष्मादौ हासः प्रकाशो यस्य।) इक्षुतूलम्। इति शब्दरत्नावली॥ बुड़िर सुता इति भाषा॥ ग्रीष्महासमपि पाठः॥

भीमा, स्त्री, (भी+मक्+स्त्रियां टाप्।) दुर्गा। इति शब्दरत्नावली॥ रोचनाख्यगन्धद्रव्यम्। इति शब्दचन्द्रिका॥ कशा। इति शब्दमाला॥ (नदीविशेषः। तद्यथा,—
"कावेरी वीरकान्ता च भीमा चैव प्रयोष्णिका।
विभावरी विशाला च गौरोदा मदनस्वसा॥
पार्व्वती चापरा नद्यो दक्षिणादिग्गमा इमाः॥"
इति पाद्मे प्रथमे खण्डे सप्तमेऽध्याये॥)

भीमादेवी, स्त्री, दुर्गा। यथा,—
"पुनश्चाहं यदा भीमं रूपं कृत्वा हिमाचले।
रक्षांसि क्षययिष्यामि मुनीनां त्राणकारणात्॥
तदा मां मुनयः सर्व्वे स्तोष्यन्त्यानम्रमूर्त्तयः।
भीमादेवीति विख्यातं तन्मे नाम भविष्यति॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम्॥

भीमैकादशी, स्त्री, (भीमेनोपासिता एकादशी। शाकपार्थिवादिवत् समासः।) भैमी। सा च माघशुक्लैकादशी। भीमद्वादश्यपि ख्याता च। यथा,—
मत्स्य उवाच।
"पुरा रथन्तरे कल्पे परिपृष्टो महात्मना।
मन्दरस्थो महादेवः पिनाकी ब्रह्मणा स्वयम्॥
ब्रह्मोवाच।
कथमारोग्यमैश्वर्य्यमनन्तममरेश्वर!।
स्वल्पेन तपसा देव! भवेन्मोक्षोऽथ वा नृणाम्॥
किमज्ञातं मया देव! त्वत्प्रसादादधोक्षज!।
स्वल्पकेनापि तपसा महत् फलमिहोच्यते॥
मत्स्य उवाच।
इति पृष्टः स विश्वात्मा ब्रह्मणा लोकभावनः।
उमापतिरुवाचेदं मनसः प्रीतिकारकम्॥
ईश्वर उवाच।
अस्माद्रथन्तरात् कल्पात् त्रयोविंशतिमो यदा।
वाराहो भविता कल्पस्तस्य मन्वन्तरे शुभे॥
वैवस्वताख्ये संजाते सप्तमे सप्तलोकधृक्।
द्वापराख्यं युगं तस्मिन् सप्तविंशतिमे तदा॥
तस्यान्ते स महानीलो वासुदेवो जनार्द्दनः।
भारावतरणार्थाय त्रिधा विष्णुर्भविष्यति॥
द्वैपायनो मुनिस्तद्वद्रौहिणेयोऽथ केशवः।
कंसादिदर्पमथनः केशवः शोकनाशनः॥
पुरी द्वारवती नाम सांप्रतं या कुशस्थली।
दिव्यानुभावसंयुक्तामधिवासाय शार्ङ्गिणः॥
त्वष्टा ममाज्ञया ब्रह्मन्! करिष्यति जगत्पतेः॥
तस्यां कदाचिदासीनः सभायाममितद्युतिः।
भार्य्याभिर्वृष्णिभिः सार्द्धं भूभृद्भिर्भूरिदक्षिणैः॥
कुरुभिर्देवगन्धर्व्वैरभितः कैटभार्द्दनः।
प्रवृत्तासु पुराणीषु धर्म्मसम्बन्धिनीषु च॥
कथासु भीमसेनेन परिपृष्टः प्रतापवान्।
त्वया पृष्टस्य धर्म्मस्य रहस्यस्यास्य भेदवित्॥
भविता स तदा ब्रह्मन्! कर्त्ता चैव वृकोदरः।
अशक्तोऽस्य धर्म्मस्य पाण्डुसूनुर्महाबलः॥
तस्य तीक्ष्णो वृको नाम जठरे हव्यवाहनः।
मया दत्तः स धर्म्मात्मा तेन चासौ वृकोदरः॥
अतीवाशादशीलश्च नागायुतबलो महान्।
भविष्यत्यजरः साक्षात् कन्दर्प इव बुद्धिमान्॥
धार्म्मिकस्याप्यशक्तस्य तीव्राग्नित्वादुपोषणे।
इमं व्रतमशेषाणां व्रतानामधिकं ततः॥
कथयिष्यति विश्वात्मा वासुदेवो जगद्गुरुः।
अशेषयज्ञफलदमशेषाघविनाशनम्॥
अशेषदुष्टशमनमशेषसुरपूजनम्।
पवित्राणां पवित्रञ्च मङ्गलानाञ्च मङ्गलम्।
भविष्यञ्च भविष्याणां पुराणानां पुरातनम्॥

वासुदेव उवाच।
यद्यष्टमीचतुर्द्दश्यौ द्वादशीष्वथ भारत!।
अन्येष्वपि दिनर्क्षेषु न शक्तस्त्वमुपोषितुम्॥
ततः पुण्यामिमां भीम! तिथिं पापप्रणा-शिनीम्।
उपोष्य विधिनानेन गच्छेद्विष्णोः परं पदम्॥
माघमासस्य दशमी यदा शुक्ला भवेत्तदा।
घृतेनाभ्यञ्जनं कृत्वा तिलैः स्नानं समाचरेत्॥
तथैव विष्णुमभ्यर्च्य नमो नारायणाय च।
कृष्णाय पादौ संपूज्य शिरः सर्व्वात्मनेति च॥
वैकुण्ठायेति वै कण्ठमुरः श्रीवत्सधारिणे।
शङ्खिने चक्रिणे तद्वद्दिने वरदाय वै॥
सर्व्वं नारायणस्यैवं संपूज्या वाहवः क्रमात्।
दामोदरायेत्युदरं मेढ्रं पञ्चशराय वै॥
ऊरू सौभाग्यनाथाय जानुनी भूतधारिणे।
नमो नीलाय वै जङ्घे पादौ विश्वसृजे पुनः॥
नमो देव्यै नमः शान्त्यै नमो लक्ष्म्यै नमः श्रियै।
नमः पुष्ट्यै नमस्तुष्ट्यै हृष्ट्यै हृष्ट्यै तथा [illegible]॥
नमो विहङ्गनाथाय वायुवेगाय पक्षिणे।
विषप्रमाथिने नित्यं गरुड़ञ्चाभिपूजयेत्॥
एवं संपूज्य गोविन्दमुमापतिविनायकौ।
गन्धैर्माल्यैस्तथा धूपैर्भक्ष्यैर्नानाविधैस्तथा॥
गव्येन पयसा सिद्धां कृशरामथ वाग्यतः।
सर्पिषा सह भुक्त्वा च गत्वा शतपदं बुधः॥
न्यग्रोधदन्तधावनमथवा खादिरं बुधः।
गृहीत्वा धावयेद्दन्तानाचान्तः प्रागुदङ्मुखः॥
ब्रूयात् सायन्तनीं कृत्वा सन्ध्यामस्तमिते रवौ।
नमो नारायणायेति त्वामहं शरणं गतः॥
एकादश्यां निराहारः समभ्यर्च्य च केशवम्।
रात्रिञ्च सकलां स्थित्वा स्नानञ्च पयसापि च॥
सर्पिषा विश्वदहनं हुत्वा ब्राह्मणपुङ्गवैः।
सहैव पुण्डरीकाक्ष! द्वादश्यां क्षीरभोजनम्॥
करिष्यामि यतात्माऽहं निर्विघ्नेनास्तु तच्च मे।
एवमुक्त्वा स्वपेद्भूमावितिहासकथां पुनः॥
श्रुत्वा प्रभाते संजाते नदीं गत्वा विशाम्पते!।
स्नानं कृत्वा मृदा तद्वत् पाषण्डानभिवर्जयेत्॥
उपास्य सन्ध्यां विधिवत् कृत्वा च पितृतर्पणम्।
प्रणम्य च हृषीकेशमनन्तञ्चाप्यनीश्वरम्॥
गृहस्य पुरतो भक्त्या मण्डपं कारयेद्बुधः।
दशहस्तमथाष्टौ वा करान् कुर्य्याद्विशाम्पते!॥
चतुर्हस्तां शुभां कुर्य्याद्वेदीमरिनिसूदन!।
चतुर्हस्तप्रमाणञ्च विन्यसेत्तत्र तोरणम्॥
आरोप्य कलसं तत्र दिक्पालान् पूजयेत्ततः।
माषमात्रेण संपूर्णमधःकृष्णाजिने स्थितः॥
तस्य धाराञ्च शिरसा धारयेत सकलां निशाम्।
धाराभिर्भूरिभिर्भूरिफलं वेदविदो विदुः॥
यस्मात्तस्मात् कुरुश्रेष्ठ! धारा धार्य्याः स्वश-क्तितः।
तथैव विष्णोः शिरसि क्षीरधाराः प्रपातयेत्॥
अरत्निमात्रं कुण्डञ्च कृत्वा तत्र त्रिमेखलम्।
योनिवक्त्रञ्च तं कृत्वा ब्राह्मणैर्यवसर्पिषी॥
तिलांश्च विष्णुदेवत्यैर्मन्त्रैरेकाग्निवत्तदा।